## विसर्जनीयस्य सः। (३४/१३८)

खरि इत्यनुवर्तते। विसर्जनीयस्य सकारः आदेशः भवति खरि परतः। वृक्षश्छादयति। प्लक्षश्छादयति। [1]वृक्षष्ठकारः। प्लक्षष्ठकारः। वृक्षस्थकारः। प्लक्षस्थकारः। वृक्षश्चिनोति। प्लक्षश्चिनोति। वृक्षष्टीकते। प्लक्षष्टीकते। वृक्षस्तरति। प्लक्षस्तरति॥

## शर्परे विसर्जनीयः। (३५/१५०)

शर्परे खरि परतो विसर्जनीयस्य विसर्जनीयादेशो भवति। [2]शशः क्षुरम्। पुरुषः क्षुरम्। अद्भिः प्सातम्। वासः क्षौमम्। [3]पुरुषः [4]त्सरुः। 'घनाघनः क्षोभयश्चर्षणीनाम्' (ऋ. १०.१०३.१)। न इति वक्तव्ये विसर्जनीयस्य [5]विसर्जनीयादेशविधानं [6]विकार[7]निवृत्त्यर्थम्, तेन जिह्वामूलीयोपध्मानीयौ[8] न भवतः॥

## वा शरि। (३६/१५१)

विसर्जनीयस्य विसर्जनीयादेशो वा भवति शरि [9]परे। वृक्षः शेते, वृक्षश्शेते। प्लक्षः शेते, प्लक्षश्शेते। वृक्षः षण्डे, वृक्षष्षण्डे। वृक्षः साये, वृक्षस्साये।

[९३८] खर्परे शरि [10]वा लोपो वक्तव्यः। (म. भा. ३.४३१)

वृक्षा स्थातारः, वृक्षाः स्थातारः, वृक्षास्स्थातारः॥

## कुप्वोः ≍क ≍पौ च। (३७/१४२)

कवर्गपवर्गयोः [11]परतो विसर्जनीयस्य यथासङ्ख्यम् ≍क ≍प इत्येतावादेशौ भवतः, चकाराद् विसर्जनीयश्च। वृक्ष≍करोति, वृक्षः करोति। वृक्ष≍खनति, वृक्षः खनति। वृक्ष≍पचति, वृक्षः पचति। वृक्ष≍फलति, वृक्षः फलति। कपौ उच्चारणार्थौ। [12]जिह्वामूलीयोपध्मानीयौ [13]एतावादेशौ। 'विसर्जनीयस्य सः' (८.३.३४/१३८) इत्येतस्मिन्नप्राप्ते[14] इदमारभ्यते इति [15]एतस्य बाधकम्, 'शर्परे विसर्जनीयः' (८.३.३५/१५०) इत्येतत् तु न बाध्यते, वासः क्षौमम्, अद्भिः प्सातम्। 'पूर्वत्रासिद्धे [16]नास्ति विप्रतिषेधोऽभावादुत्तरस्य' (जै. प. ६७) इति 'शर्परे विसर्जनीयः' (८.३.३५/१५०) इत्येतदेव भवति। केचित्तु एतदर्थं योगविभागं कुर्वन्ति। [17]कुप्वोः शर्परयोः विसर्जनीयस्य विसर्जनीयः आदेशो भवति. किमर्थमिदम्, ≍क ≍पौ च इति [18]वक्ष्यति, तद्बाधनार्थमिति॥

---

1. वृक्षष्टकारेण प्लक्षष्टकारेण क. 2. यशः इ. 3. उदाहरणमिदं नास्ति इ. 4. त्सरुकः क. 5. विसर्जनीयादेशः इ, विसर्जनीयवचनं ब. क. 6. तद् इत्यधिकम् ड. 7. निवृत्त्यर्थं इ. 8. अपि इत्यधिकम् क. इ. ह. 9. परतः क. 10. सलोपः क. 11. खरि इत्यधिकम् इ. ड. ह. 12. ककारपकारयोः इत्यधिकम् इ. 13. एतौ नास्ति इ, ककारखकारौ ड. ह. 14. वचनम् इत्यधिकम् ब. क. ड. 15. तस्यैवायं बाधकः इ. 16. नास्ति-उत्तरस्य नास्ति इ. 17. वाक्यमिदं नास्ति ड. 18. वक्ष्यति नास्ति क.